सप्तसागरः, पुं, (सप्त सगरा इव कुण्डानि यत्र ।) महादानविशेषः । यथा,—

मत्स्य उवाच ।

"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
सप्तसागरकं नाम सर्व्वपापविनाशनम् ॥
पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनं बुधः ॥
ऋत्विङ्मण्डपसंभारभूषणाच्छादकादिकम् ।
कारयेत् सप्त कुण्डानि काञ्चनानि विचक्षणः ॥
प्रादेशमात्राणि तथारत्निमात्राणि वा पुनः ।
कुर्य्यात् सप्तपलादूर्द्ध्वमासहस्राच्च शक्तितः ॥
संस्थाप्यानि च सर्व्वाणि कृष्णाजिनतिलोपरि ।
प्रथमं पूरयेत् कुण्डं लवणेन विचक्षणः ॥
द्वितीयं पयसा तद्वत् तृतीयं सर्पिषा पुनः ।
चतुर्थन्तु गुडेनैव दध्ना पञ्चममेव च ॥
षष्ठं शर्करया तद्वत् सप्तमं तीर्थवारिणा ।
स्थापयेल्लवणस्यान्तु ब्रह्माणं काञ्चनं शुभम् ॥
केशवं क्षीरमध्ये तु घृतमध्ये महेश्वरम् ।
भास्करं गुडमध्ये तु दधिमध्ये सुराधिपम् ॥
शर्करायां न्यसेत् लक्ष्मीं जलमध्ये तु पार्व्वतीम् ।
सर्व्वेषु सर्व्वरत्नानि धान्यानि च समन्ततः ॥
तुलापुरुषवत् शेषमत्रापि परिकल्पयेत् ।
ततो वारुणहोमान्ते स्नापितो वेदपुङ्गवैः ।
त्रिः प्रदक्षिणमावृत्य मन्त्रानिमानुदीरयेत् ॥
नमो वः सर्व्वसिन्धूनां आधारेभ्यः सनातनाः ।
जन्तूनां प्राणदेभ्यश्च समुद्रेभ्यो नमो नमः ॥
क्षीरोदकाज्यदधिमाधवलावणेक्षु-
सारामृतेन भुवनत्रयजीवसंघान् ।
आनन्दयन्ति वसुभिश्च यतो भवन्त-
स्तस्मान्ममाप्यघविघातमलं दिशन्तु ॥
यस्मात् समस्तभुवनेषु भवन्त एव
तीर्थामरासुरसुरेन्द्रमणिप्रतानम् ।
पापक्षयामृतविलेपनभूषणाय
लोकस्य बिभ्रति तदस्तु ममापि लक्ष्मीः ॥
इति ददाति रसामरसंयुतान्
शुचिरविस्मयवानिह सागरान् ।
अमलकाञ्चनवर्णमयानसौ
पदमुपैति हरेरमरार्च्चितः ॥
सकलपापविघातविराजितं
पितृपितामहपुत्त्रकलत्रकम् ।
नरकलोकसमाकुलमप्यलं
झटिति नेतुमसौ शिवमन्दिरम् ॥"

इति मत्स्यपुराणे महादानानुकीर्त्तने सप्तसागरप्रदानिको नाम २९१ अध्यायः ॥

सप्तसूः, स्त्री, (सप्त सूते इति । सू+क्विप् ।) सप्तपुत्त्रप्रसूता । तत्पर्य्यायः । सुतवत्सरा २ । इति शब्दरत्नावली ॥

सप्तांशुपुङ्गवः, पुं, (सप्तभिरंशुभिः पुङ्गव इव श्रेष्ठत्वात् ।) शनिग्रहः । इति जटाधरः ॥

सप्तार्च्चिः, [स्] पुं, (सप्त अर्च्चींषि यस्य ।) अग्निः । (यथा, रघुः । १० । २१ ।
"सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् ।
सप्तार्च्चिर्म्मुखमाचख्युः सप्तलोकैकसंश्रयम् ॥")
चित्रकवृक्षः । इत्यमरः ॥ शनिग्रहः । इति हेमचन्द्रः ॥ क्रूरचक्षुषि, त्रि । इति मेदिनी ॥ अग्नेः सप्तानामर्च्चिषां नामानि सप्तजिह्वशब्दे द्रष्टव्यानि ॥

सप्ताश्वः, पुं, (सप्त अश्वा यस्य ।) सूर्य्यः । अर्कवृक्षः । इत्यमरः ॥ (क्वचित् वाच्यलिङ्गेऽपि दृश्यते । यथा, ऋग्वेदे । ५ । ४५ । ९ ।
"आ सूर्य्यो यातु सप्ताश्वः क्षेत्रं यदस्योर्विया-दीर्घयाथे ॥"
"सूर्य्यः सर्व्वस्य प्रेरको देवः सप्ताश्वः सर्पणस्वभावाश्वोपेतः सप्तसंख्याकाश्वो वा आयातु अस्मदभिमुखमागच्छतु ॥" इति तद्भाष्ये सायणः ॥)

सप्ताश्ववाहनः, पुं, (सप्त अश्वा वाहनान्यस्य ।) सूर्य्यः । यथा,—
"लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा ।
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥"
इति शाम्बपुराणे सूर्य्यस्तोत्रम् ॥

सप्तिः, पुं, ("षप समवाये । 'सपिनसिवसिपदिभ्यस्तिप्' इति श्रीभोजदेवः । सपति सङ्ग्रामेषु सहसामेवेति । गतिकर्म्मणो वा सप्तिः । सपतेः सर्पार्थात् इति माधवः । सृपि गतौ । अस्मादा तिप्रत्यये गुणे च रेफलोपो बाहुलकात् सर्पति सप्तिः ।" इति निघण्टुटीकायां देवराजयज्वा । १ । १४ । ५ ।) अश्वः । इत्यमरः ॥ (यथा, ऋग्वेदे । ८ । ४ । १४ ।
"अर्व्वाञ्चं त्वा सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप ॥")

सफरः, पुं, मत्स्यविशेषः । पुटी इति भाषा ॥ शयाना स्फुरति पार्श्वेन गच्छतीति शफरी मनीषादिः नदादित्वादीप् । शफिशफरीशब्दाशकटशिलाशरणप्रतपदा इत्युणादित्वात् तालव्यादिः । दन्त्यादिरपीति केचित् । शफरश्च । इत्यमरटीकायां भरतः ॥

सफरी, स्त्री, (सफर+ङीष् ।) मत्स्यविशेषः । इति भरतः ॥ पुँटी इति भाषा ॥ तत्पर्य्यायः । शफरी २ प्रोष्ठी ३ । इत्यमरः ॥ शफरः ४ श्वेतकोलः ५ । इति त्रिकाण्डशेषः ॥ (यथा,—
"अगाधजलसञ्चारी रोहितोऽपि स्थिरायते ।
गण्डूषजलमात्रेण सफरी फर्फरायते ॥"
इत्युद्भटः ॥)

सफलं, त्रि, (फलेन सह वर्त्तमानम् ।) फलविशिष्टम् । तत्पर्य्यायः । अमोघम् २ । इति जटाधरः ॥ (यथा, मार्कण्डेये । ६१ । ३७ ।
"सफलं मे भवेज्जन्म यदि मां नावमन्यसे ॥"
सशस्यम् । यथा, कथासरित्सागरे । २५ । १२ ।
"अपश्यदाश्रमपदं सफलक्षितिपादपम् ॥")

सबलः, त्रि, (बलेन सह वर्त्तमानः ।) सैन्ययुक्तः । सामर्थ्यवान् । यथा,—
"सबले च गुरौ पापे दिनमात्रं प्रचक्षते ।
मध्ये बले तथा मासं वर्षं विद्यात्तथाबले ॥"
इति पञ्चस्वरा ॥

सबलिः, पुं, विकालः । इति हेमचन्द्रः ॥

सबाधः, त्रि, पीडायुक्तः । निषेधयुक्तः । बाधया बाधेन च सह वर्त्तमानो यः इति बहुव्रीहिसमासनिष्पन्नः ॥

सब्रह्मचारी, [न्] पुं, (ब्रह्म वेदस्तदध्ययनार्थं यद्व्रतं तदपि ब्रह्म तच्चरतीति ब्रह्मचारी समानो ब्रह्मचारी । यद्वा, समाने ब्रह्मणि चरतीति । णिनिः । "चरणे ब्रह्मचारिणि ।" ६ । ३ । ८६ । इति समानस्य सः ।) परस्परैकब्रह्मव्रताचारः । इत्यमरः ॥ एकस्माद्गुरोर्ब्रह्मणि वेदाय अर्थात् वेदाध्ययनाय व्रतं अभि ब्रह्मचर्य्याख्यं आचरन्ति ये तेऽन्योन्यं सब्रह्मचारिण उच्यन्ते । उपचारात् ब्रह्माध्ययनार्थं व्रतमपि ब्रह्म । समानं ब्रह्म चरन्तीति ग्रहादित्वाणिनि ज्योतिर्ज्जनपदेत्यादिना समानस्य सभावे सब्रह्मचारिणः । एकब्रह्मव्रताचारा इत्यत्र एकस्माद्ब्रह्मणि ब्रह्माधीतुं व्रतमाचरन्तीति तुमर्थे चतुर्थी विग्रहन्तीति परे । सब्रह्मचारी भिन्नगुरुशिष्य इति हारावलीति नयनानन्दः । इति भरतः ॥

सभर्तृका, स्त्री, (भर्त्रा सह वर्त्तमाना । सहस्य सः ।) विद्यमानपतिका । तत्पर्य्यायः । पतिवत्नी २ । इत्यमरः ॥ सधवा ३ सनाथा ४ । इति जटाधरः ॥

सभा, स्त्री, (सह भान्ति शोभन्ते यत्रेति । भा दीप्तौ+भिदादित्वात् अधिकरणे अङ् । सहस्य सः ।) सह भान्ति अत्र । मज्लिस् इति पारसीक भाषा । पञ्चायित इति हिन्दी भाषा । मिटिं इति इङ्गरेजी भाषा । तत्पर्य्यायः । समज्या २ परिषत् ३ गोष्ठी ४ समितिः ५ संसत् ६ आस्थानी ७ आस्थानम् ८ सदः ९ समाजः १० । इत्यमरः ॥ पर्षत् ११ इति जटाधरः ॥ तल्लक्षणादि यथा । मनुः ।
"यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः ।
राज्ञः प्रतिकृतो विद्वान् ब्राह्मणस्तां सभां विदुः ॥" * ॥
त्रिदशसंख्यतावपि सभापर्य्याप्तपरिषच्छब्दमाह स एव ।
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ।
त्रयश्चाश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा ॥"
त्रैविद्यः त्रिवेदपारगः । हैतुकः सद्युक्तिव्यवहारी । अतएवामरसिंहः । सभा सदसि सभ्ये च । अत्र भा दीप्तिः प्रकाशो ज्ञानमिति यावत् । तया सह साक्षात् परम्परया वा वर्त्तते इति सभा ॥ * ॥ कात्यायनः ।
"कुलशीलवयोवृत्तवित्तवद्भिरधिष्ठितम् ।
वणिग्भिः स्यात् कतिपयैः कुलवृद्धैरधिष्ठितम् ॥"
सद इति शेषः । इति व्यवहारतत्त्वम् ॥ * ॥ सामाजिकः । द्यूतम् । गृहम् । इति मेदिनी ।